१३५। इति कः। क्रीड़नकाले कन्दुकानां ऊर्द्ध-
क्षेपणप्रसिद्धतयास्य तथात्वम्।) कन्दुकः। इति
त्रिकाण्डशेषः॥
चोद्यं, क्ली, (चोदयति प्रेरयति चित्तं रसविशेषे
अनेनेति। चुद्+णिच्+ण्यत्।) अद्भुतम्।
प्रश्नः। इति मेदिनी। ये, २३॥ (यथा, महा-
भारते। ५। ४३। ३४।
"सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च।
अस्तेयं ब्रह्मचर्य्यञ्च तथासंग्रहमेव च॥")
चोद्यः, त्रि, (चोदयितुं प्रेरयितुं योग्यः। "अर्हे
कृत्यतृचश्च।" ३। ३। १६९। इति यत्।)
चोदनार्हः। प्रेरणयोग्यः। इति मेदिनी। ये,
२३॥ (यथा, महाभारते। ५। ३८। ७।
"नीवारमूलेङ्गुदशाकवृत्तिः
सुसंयतात्माग्निकार्य्येषु चोद्यः।
वने वसन्नतिथिष्वप्रमत्तो
धुरन्धरः पुण्यकृदेष तापसः॥")
चोपनं, क्ली, (चुप मन्दगमने+भावे ल्युट्।) शनै-
र्गमनम्॥
चोरः, पुंस्त्री, (चोरयतीति। चुर+णिच्+पचा-
द्यच्।) स्तेयकर्त्ता। तत्पर्य्यायः। चौरः २ दस्युः ३
तस्करः ४ प्रतिरोधी ५ मलिम्लुचः ६ स्तेनः ७
ऐकागारिकः ८ स्तैन्यः ९ प्रच्छन्नजनः १०
मोषकः ११ पाटच्चरः १२ पराश्कन्दी १३
कुम्भिलः १४ खनकः १५ शङ्कितवर्णः १६
खानिकः १७। इति शब्दरत्नावली॥ प्रचुर-
पुरुषः १८। इति त्रिकाण्डशेषः॥ लुपुः १९
तक्वा २० रिभ्वा २१ रिपुः २२ रिक्वा २३
विहायाः २४ तायुः २५ वनर्गुः २६ हुरश्चित् २७
मुषीवान् २८ मलिम्लुचः २९ अघशंसः ३०
वृकः ३१। इति वेदनिघण्टौ ३ अध्यायः॥
(यथा, देवीभागवते १। १९। ६।
"चोरेषु चौरबुद्धिस्ते साधुबुद्धिस्तु तापसे।
स्वपरत्वं तवाप्यस्ति विदेहत्वं कथं नृप!॥")
कृष्णशटी। इति क्रमचन्द्रिकाधृतहड्डचन्द्रः॥
गन्धद्रव्यविशेषः। यथा। चोरकुङ्कुमरोचनाः।
इत्युग्रगन्धकथने आगमः॥
चोरकः, पुं, (चोरो गन्धद्रव्यविशेषस्तद्वत् काय-
तीति। कै+कः।) पृक्का। इति रत्न-
माला॥ पिड़िङ्ग इति भाषा। (चोर+स्वार्थे
कन्।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः।
शङ्कितः २ खड्गः ३ दुष्पत्रः ४ क्षेमकः ५ रिपुः ६
चपलः ७ कितवः ८ धूर्त्तः ९ पटुः १० नीचः ११
निशाचरः १२ गणहासः १३ कोपनकः १४
चोरः १५ पत्रचोरकः १६ दुष्कुलः १७ ग्रन्थिलः १८
सुग्रन्थिः १९ पर्णचोरकः २० ग्रन्थिपर्णः २१
ग्रन्थिदलः २२ ग्रन्थिपत्रः २३। (यथा, सुश्रुते
कल्पस्थाने ६ अध्याये।
"चोरको वरुणः कुष्ठं सर्व्वगन्धा सप्तला॥")
अस्य गुणाः। तीव्रगन्धत्वम्। उष्णत्वम्। तिक्त-
त्वम्। वातकफनासासुखरुजाजीर्णक्रिमिदोष-
नाशित्वञ्च। इति राजनिर्घण्टः॥

चोरपुष्पिका, स्त्री, (चोरपुष्पी+स्वार्थे संज्ञायां
वा कन् टाप् पूर्व्वह्रस्वश्च।) चोरपुष्पी। इति
शब्दरत्नावली॥ ("शङ्खिनी चोरपुष्पिका।"
इति वैद्यकम्॥)
चोरपुष्पी, स्त्री, (चोरो गन्धद्रव्यविशेषस्तद्वत् सुगन्धि
पुष्पमस्याः। "पाककर्णपर्णेति।" ४। १। ६४।
इति ङीष्।) क्षुपविशेषः। चोया इति चोर-
हुली इति च ख्याता इति भरतः॥ तत्पर्य्यायः।
शङ्खिनी २ केशिनी ३। इत्यमरः। २। ४। १२६॥
चोरपुष्पिका ४। इति शब्दरत्नावली॥
(चोरा ५। इति शब्दचन्द्रिका॥)
चोरस्नायुः, स्त्री, (चोरस्य स्नायुरिव।) काक-
नासालता। तस्करस्नायुरिति राजनिर्घण्ट-
दर्शनात्॥
चोरा, स्त्री, (चोरो गन्धद्रव्यविशेषः तस्येव गन्धो-
ऽस्त्यस्य। अच् ततष्टाप्।) चोरपुष्पी। इति
शब्दचन्द्रिका॥
चोरिका, स्त्री, (चोरस्य भावः। मनोज्ञादि-
त्वात् वुञ्।) चौरिका। चौर्य्यम्। इत्यमर-
टीकायां रायमुकुटः॥
चोलः, पुं, (चोलयति समुच्छ्रयति स्त्रीणां वक्षः-
प्रदेशे इति। चुल उन्नतौ+अच्।) कञ्चुलिका।
काँचुलि इति भाषा॥ (यथा, आनन्दलह-
र्य्याम्। ६६।  तम्॥")
"निर्वा वीणां वाणी निचुलयति चोलेन निभृ-
तत्पर्य्यायः। कूर्पासकः २। इत्यमरः। २। ६। ११८॥
कञ्चूकः ३। इति जटाधरः॥ कञ्चुली ४ कञ्चु-
लिका ५। इति शब्दरत्नावली॥ स्त्रीणां निचोल
इति रमानाथः॥ पुंसोऽप्येतौ चोला इति ख्यातौ
इति सुभूतिः॥ गदादित्वात् चोली च। कूर्परः
कफोणिर्जानु च तद्द्वयमसति क्षिप्यते अत्र
कूर्पासः पृषोदरादित्वादलोपः ततः स्वार्थे
कः। इति भरतः॥ * ॥ देशविशेषः। इति
शब्दरत्नावली। अधुना ताञ्जोर इति ख्यातः॥
शस्त्रधारिवेदयागानधिकारिम्लेच्छविशेषः। स तु
पूर्व्वं क्षत्त्रिय आसीत् सगरराजेनास्य धर्म्मनाशं
वेशान्यत्वञ्च चकार। इति हरिवंशः॥
चोलकं, क्ली, (चोलयति आच्छादयतीति। चुल+
णिच्+अच्+स्वार्थे कन्। यद्वा चोल इव
कायति इति। कै+कः।) वल्कलम्। इति
शब्दरत्नावली॥
चोलकः, पुं, (चोल इव कायति इति। कै+कः।)
बाणवारः। कवचम्। इति हारावली। १६७॥
(देशभेदः। यथा कथासरित्सागरे। १९। ९५।
"उह्यमाना कावेरी तेन संमर्द्दकारिणा।
चोलकेश्वरकीर्त्तिश्च कालुष्यं ययतुः समम्॥")
चोलकी, [न्] पुं, (चोलकमिवास्त्यस्य इति
इनिः।) करीरः। नारङ्गः। किष्कुपर्व्व। इति
मेदिनी। ने, १८४॥
चोलण्डुकः, पुं, (चोलस्य अण्डुक इव शकन्ध्वादि-
त्वात् साधुः।) शिरोवेष्टः। इति त्रिकाण्ड-
शेषः॥

चोषः, पुं, (चीयते इति। चि+डः। ततः उष-
दाहे+अप्। चश्चासौ उषश्चेति।) पार्श्व-
ज्वाला॥ यथा,—
"हृत्कूलपीड़नयुतं पवनेन पित्त-
मूड्दाहचोषबहुलं सकफप्रसेकम्।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजड़ताभिरथापरञ्च॥
चोषः पार्श्वस्थितामिनेव सन्तापः।"इति भाव-
प्रकाशः॥ (यथाच, सुश्रुते। १। ४२।
"यो गले चोषमुत्पादयति मुखवैशद्यं जनयति
भक्तरुचिं चापादयति हर्षञ्च स तिक्तः॥")
चोस्कः, पुं, (चन्दयति आह्लादयति। चदि+डः।
ततः स्कन्दति आक्रमते शत्रून् स्कुनाति आप्र-
वते वा। स्कन्दि स्कु वा+डः। ततः पृषोदरा-
दीत्वे साधुः।) सिन्धुवारदेशीयाश्वः। इति
त्रिकाण्डशेषः॥
चौक्षं, त्रि, (चोक्ष एव इति। स्वार्थे अण्।) मनो-
ज्ञम्। इति महाभारतम्॥
चौरः, पुं स्त्री, (चोर एव प्रज्ञादिभ्योऽण्। यद्वा
चुरा शीलमस्य। "इति छत्रादिभ्यो णः।" ४। ४।
६२। इति णः।) चोरः। इत्यमरः। २। १०। २४॥
(यथा, देवीभागवते। १। १९। ५६।
"चौरं वा तापसं वापि समानं मन्यते कथम्॥"
असुरविशेषः। यथा, हरिवंशे। १७६। १९।
"किरातीं चौरवसनां चौरसेनागमस्कृताम्॥"
कविभेदः।
"कविरमरः कविरमरुः कविश्चौरो मयूरकः॥"
इत्युद्भटः॥)
चोरपुष्पी। इति मेदिनी। रे, ३७॥ (चोर-
पुष्पीशब्दे विवरणमस्य ज्ञेयम्॥) सुगन्धिद्रव्य-
विशेषः। इति हेमचन्द्रः॥
चौरिका, स्त्री, (चोरस्य कार्य्यं भावो वा। "द्वन्द्व-
मनोज्ञादिभ्यश्च।" ५। १। १३३। इति वुञ्।
टापि अत इत्वम्।) चौर्य्यम्। इत्यमरः। २।
१०। २५॥ (यथा, मनुः। १। ८२।
"चौरिकानृतमायाभिर्धर्म्मश्चापैति पादशः॥")
चौरी, स्त्री, (चौर+ङीष्।) चौर्य्यम्। इति
शब्दरत्नावली॥ (गायत्त्रीरूपा महाशक्तिः।
यथा, देवीभागवते। १२। ६। ४९।
"चन्द्रिका चन्द्रधात्री च चौरी चौरा च
चण्डिका॥")
चौर्य्यं, क्ली, (चोरस्य कर्म्म भावो वा। "गुण-
वचनाद् ब्राह्मणादिभ्यः कर्म्मणि च।" ५। १।
१२४। इति ष्यञ्।) चौरधर्म्मः। चोरी इति
चुरी इति च भाषा॥ तत्पर्य्यायः। स्तैन्यम् २
स्तेयम् ३ चौरिका ४। इत्यमरः। २। १०। २५॥
चौरी ५। इति शब्दरत्नावली॥ चोरिका ६।
इत्यमरटीका॥ (यथा, मनुः। ९। २७६।
"सन्धिं छित्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः।
तेषां छित्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्॥")
चौलकर्म्म, [न्] क्ली, (चूड़ाया इदम्। "तस्ये-
दम्।" ४। ३। १२०। इत्यण् डस्य लत्वञ्च।